# शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली

# Directorate of education, GNCT of Delhi

## अभ्यासप्रश्नपत्रम्

## कक्षा - दशमी

## संस्कृतम् (कोड-122) (2022-23)

प्रथम–सत्रम्

समयः – होरात्रयम् सम्पूर्णाङ्काः – 80

**सामान्यनिर्देशाः-**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्मिन् प्रश्नपत्रे चत्वारो खण्डाः सन्ति।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

| | | | |
|---|---|---|---|
| ‘क’ - खण्डः | – | अपठित-अवबोधनम् | 10 अङ्काः |
| ‘ख’ - खण्डः | – | रचनात्मक-कार्यम् | 15 अङ्काः |
| ‘ग’ - खण्डः | – | अनुप्रयुक्त-व्याकरणम् | 25 अङ्काः |
| ‘घ’ - खण्डः | – | पठित-अवबोधनम् | 30 अङ्काः |

| | **‘क’ - खण्डः – अपठितावबोधनम् 10 अङ्काः** | |
|---|---|---|
| **1.** | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–<br>लौहपुरुषः वल्लभ भाई पटेलः स्वतन्त्रतासङ्ग्रामस्य सेनानायकः आसीत्। तस्य पितुः नाम झावेर भाई मातुश्च नाम लाडबा देवी आसीत्। सः एकः आदर्शः देशभक्तः, नेतृत्वकुशलश्च राजनीतिज्ञः आसीत्। खेड़ा–आन्दोलने वल्लभ–भाई–पटेलः स्वतन्त्रतासेनानीनां नेतृत्वं चकार। तस्य नेतृत्वं साफल्यं प्राप। बारदोली सत्याग्रहेऽपि तस्य अभूतपूर्वं नेतृत्वकौशलं वीक्ष्य ग्रामवासिनः तं ‘सरदार’ इति उपाधिना अलङ्कृतवन्तः। स्वातन्त्र्यात् पूर्वं भारतदेशः स्वायत्त–राज्येषु विभक्तः आसीत्। स्वायत्त–राज्यानाम् एकीकरणे लौहपुरुषस्य महद् योगदाम् आसीत्।<br>अ. **एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | 10<br><br><br><br><br><br><br>1x2=2 |

| | | |
|---|---|---|
| | (i) कः स्वतन्त्रतासङ्ग्रामस्य सेनानायकः आसीत्?<br>(ii) स्वातन्त्र्यात् पूर्वं भारतदेशः केषु विभक्तः आसीत्?<br>(iii) स्वायत्त–राज्यानाम् एकीकरणे कस्य महद् योगदानम् आसीत्?<br>**आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) वल्लभ–भाई–पटेलस्य पितुः मातुश्च किं नाम आसीत्?<br>(ii) खेड़ा–आन्दोलने स्वतन्त्रतासेनानीनां नेतृत्वं कः चकार?<br>(iii) बारदोली सत्याग्रहे ग्रामवासिनः ‘सरदार’ इति उपाधिना कम् अलङ्कृतवन्तः?<br>इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।<br>**ई. यथानिर्देशम् उत्तरत- (केवल प्रश्नत्रयम्)**<br>(i) **‘चकार’** क्रियायाः कर्तृपदं किम्?<br>(क) खेड़ा–आन्दोलने (ख) वल्लभ–भाई–पटेलः (ग) स्वतन्त्रतासेनानीनां<br>(ii) गद्यांशेऽस्मिन् **‘दृष्ट्वा’** पदस्य किं पर्यायपदं प्रयुक्तम्?<br>(क) वीक्ष्य (ख) नेतृत्वकौशलं (ग) चकार<br>(iii) **‘सः एकः आदर्शः देशभक्तः...’** अत्र सः इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(क) झावेर भाई (ख) लाडबा देवी (ग) वल्लभ–भाई–पटेलः<br>(iv)**‘लौहपुरुषः वल्लभ भाई पटेलः’** अनयोः पदयोः किं विशेषणपदम्?<br>(क) लौहपुरुषः (ख) लौहः (ग) वल्लभ–भाई–पटेलः | <br><br><br>2x2=4<br><br><br><br>(1)<br>1x3=3 |
| | | |
| | **‘ख’ - खण्डः – रचनात्मकं-कार्यम् 15 अङ्काः** | |
| **2.** | **अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत–**<br>**भवान् वन्दनः, स्वीयं भ्रातरं भुवनं प्रति लिखिते पत्रे स्वस्थभोजनस्य महत्त्वं वर्णयन्तः भुवनं स्वस्थभोजनाय प्रेरयति–**<br>प्रिय भुवन!<br>सस्नेहं ……(i) ……<br>तव मित्रस्य लिखितं ….(ii)…. प्राप्तम्। तेन पत्रेण मया ज्ञातम् यत् भवान् ……(iii)…… भोजनं न सेवते, भवान् प्रतिदिनं ‘चाऊमीन-बर्गर’ इत्यादि खादति, ईदृशं भोजनं स्वास्थ्याय सम्यक् न अस्ति। कदाचित् तु अस्य ……(iv)…. कर्तुं शक्यते परं प्रतिदिनं त्वरितभोजनस्य सेवनं स्वास्थ्याय ……(v)…… अस्ति।<br>उत्तमस्वास्थ्याय तु पुष्टिप्रदं भोजनं एव ……(vi)…….., यतोहि उच्यते एवम्– ‘स्वस्थशरीरे एव ……(vii)……. वासः’ भवति अतः भवान् त्वरितभोजनस्य सेवनं मा करोतु। स्वास्थ्यवर्धकभोजनमेव खादतु। अनेन भवान् कदापि ………(viii)……… न भविष्यति। भवान् स्वस्वास्थ्यविषये जागरूकः तिष्ठतु इति मे ……(ix)……..।<br>भवतः ज्येष्ठो भ्राता ……(x)………<br>**मञ्जूषा**<br>हानिकरम् , सेवनं, स्वीकर्तव्यम्, वन्दन, पत्रं, अनुरोधः, पुष्टिप्रदं , नमस्ते, स्वस्थमनसः, रुग्णः | ½ x10=5 |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत- 1x5=5



मञ्जूषा

| |
|---|
| गङ्गानदी, लक्ष्मणझूला, मार्गं, चटका, गृहाणि , उपरि, पादपाः, बालकः, वृक्षः, नौका, विहरन्ति, नयति, जलं, स्थापयति, जनाः, आकाशे, मत्स्याः, अन्तः, मेघाः, शैत्यं, ऋषिकेशे, नौकाविहारं |

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।

**'कालिदासः'**

**मञ्जूषा**

| |
|---|
| प्रियकविः, विद्यार्थी, कालिदासः, उपमाकालिदासस्य, प्रसिद्धा, मम, कविषु, काव्येषु, कविकुलशिरोमणिः, लोकप्रियः, भाषाप्रवाहः |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवल वाक्यपञ्चकम्) 1x5=5

(i) वे पुस्तक पढ़ते हैं। (a) They read books .

(ii) वरेण्या दूरदर्शन देखती है। (b) Varenya watches T.V..

| | | |
|---|---|---|
| | (iii) मैं पार्क में जाता हूं। (c) I go to in the park.<br>(iv) तुम सब प्रार्थना सभा में जाओ। (d) All of you go to in assembly.<br>(v) हम सभी विद्यालय जाएंगें। (e) We will go to school.<br>(vi) हाथी केला खाते हैं। (f) Elephants eat bananas. | |
| | 'ग' - खण्डः – अनुप्रयुक्त-व्याकरणम् 25 अङ्काः | |
| **5.** | अधोलिखितेषु वाक्येषु रेखांकितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत– (केवलं प्रश्नचतुष्टयम्)<br>i. अयमेकः **तावद्विभज्य** भुज्यताम्।<br>ii. **युष्मत्+दर्शनात्** कुशलमिव।<br>iii. **सत्+निधीयन्तां** सभासदः।<br>iv. वयसस्तु न **किञ्चिद**न्तरम् ।<br>v. सर्वत्र जलोपप्लवः **सम्+ जातः।** | 1x4=4 |
| **6.** | अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)<br>(i) कश्चित् दृश्यते **त्रिदशाधिप!।**<br>(क) त्रिदशानाम् अधिपः (ख) त्रिदश च ते अधिपः (ग) त्रिदशाः अधिपः<br>(ii) **व्यवधानेन सहितम्** न चारित्रलोपाय।<br>(क) व्यवधानसहितम् (ख) सहितव्यवधानम् (ग) सव्यवधानम्<br>(iii) **दुर्वह**मत्र जीवितं जातम्<br>(क) दुर्गतिः वहा (ख) दुःखेन वहम् (ग) दुष्टं वहनम्<br>(iv) राजसिंहः नाम **राजपुत्रः** वसति स्म।<br>(क) राजः पुत्रः (ख) राजानः पुत्रः (ग) राज्ञः पुत्रः<br>(v) **कुत्सितवस्तुमिश्रितं** भक्ष्यम्<br>(क) कुत्सितवस्तुभिः मिश्रितं (ख) कुत्सितवस्तूनां मिश्रितं (ग) कुत्सितवस्तुने मिश्रितं । | 1x4=4 |
| **7.** | अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)<br>अन्योऽपि **बुद्धिमान्** लोके मुच्यते महतो भयात्।<br>(क) बुद्धि+ मान (ख) बुद्धि+ मतुप् (ग) बुद्धिमान+ मतुप्<br>) महात्मानः चित्तवाचोः **सम+त्व** आहुः।<br>(क) समता (ख) समत्वता (ग) समत्वम्<br>(iii) पशुपति–मस्तककेतक**च्छदत्वम्**<br>(क) छद+तल् (ख) छद+तुमुन् (ग) छद+त्व<br>(iv) पाषाणी **सभ्यता** निसर्गे न स्यात्<br>(क) सभ्य+तल् (ख) सभ्य +ठक् (ग) सभ्य +त्व | 1x4=4 |

| | | |
|---|---|---|
| | (v) **<u>शारीरिकं</u>** मानसिकं वाचिकं ऐक्यं स्यात्।<br>(क) शरीर+फक्     (ख) शरीर +ठक्     (ग) शरीर +त्व | |
| | | |
| **8.** | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत।   (केवलं प्रश्नत्रयम्)**<br>(i) किम् …………. वनं गच्छन्ति।<br>(क) छात्र:   (ख) छात्रा:   (ग) छात्रै:<br>(ii) आम्! छात्राभिः वनं ……….।<br>(क) गम्यन्ते   (ख) गम्यत:   (ग) गम्यते।<br>(iii) ……………. लेखः लिख्यते।<br>(क) तस्मै   (ख) तेषु   (ग) तेन<br>(iv) ……………… आशा क्रियते।<br>(क) निर्धनाः   (ख) निर्धनेभ्यः   (ग) निर्धनैः | **1x3=3** |
| | | |
| **9.** | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) छात्रा 7:15 ……………… विद्यालयं गच्छति।<br>(ii) विद्यालये ………..7.45……… प्रार्थनासभा भवति।<br>(iii) संस्कृतकक्षा ………..8.15……… भवति<br>(iv) धन्वन्तरिः 10.00 ……… अल्पाहारं स्वीकरोति।<br>(v) माता 9. 30 …………. मन्दिरम् गच्छति। | **1x4=4** |
| | | |
| **10.** | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्)**<br>(i) यत्र आस्ते सा धूर्ता ……………. गम्यताम्।<br>(ii) मनः शोषयत् तनुः पेषयद् भ्रमति ……………………..वक्रम्॥<br>(iii) यत्र-यत्र सूर्यरश्मिः ……………………………… प्रकाशः ।<br>(iv) ………….. त्वं किं करिष्यसि?<br>**मञ्जूषा**<br>तत्र-तत्र, अद्य, सदा , तत्र | **1x3=3** |
| | | |
| **11.** | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धपदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)**<br>(i) माता भोजनम् **<u>आनयामः</u>**। | **1x3=3** |

| | | |
|---|---|---|
| | (क) आनयन्तु (ख) आनयति (ग) आनयन्ति<br>(ii) सिंहः **गहनस्य** वने निवसति।<br>(क) गहनाय (ख) गहने (ग) गहनात्<br>(iii) अहम् क्रीडाक्षेत्रे **क्रीडति**।<br>(क) क्रीडसि (ख) क्रीडामः (ग) क्रीडामि<br>(iv) बुद्धिमत्यः **बालिका** नृत्यन्ति।<br>(क) बालकाः (ख) बालिक्यः (ग) बालिकाः | |
| | **'घ' - खण्डः – पठित-अवबोधनम् 30 अङ्काः** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्।<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) कः क्षेत्रकर्षणं कुर्वन्नासीत्?<br>(ii) कृषकः कं तोदनेन नुद्यमानः अवर्तत।<br>(iii) हलमूढ्वा गन्तुमशक्तः दुर्बलो वृषभः कुत्र पपात?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) क्रुद्धः कृषीवलः किम् अकरोत्?<br>(ii) भूमौ पतितं स्वपुत्रं दृष्ट्वा कस्य नेत्राभ्यामश्रूणि आविरासन्?<br>(iii) कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।<br>**इ) यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)**<br>**(i) 'दुर्बलं वृषभं'** अनयोः पदयोः किं विशेषणपदम्?<br>**(ii) 'सबलम्'** इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?<br>**(iii) 'अवर्तत'** क्रियायाः कर्तृपदं किम्? | 5<br><br>½x2=1<br><br>1x2=2<br><br>1x2=2 |
| | | |
| **13.** | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।**<br>**वाष्पयानमाला सन्धावति वितरन्ती ध्वानम्॥**<br>**यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।**<br>**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) वाष्पयानमाला किं वितरन्ती सन्धावति?<br>(ii) कः धूमं मुञ्चति? | 5<br><br>½x2=1 |

| | | |
|---|---|---|
| | (iii) संसरणं कीदृशं जातम् ?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) वाष्पयानमाला किं करोति?<br>(ii) केषां पङ्क्तयः हि अनन्ताः?<br>(iii) कज्जलमलिनं किं मुञ्चति?<br>**इ) यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)**<br>(i) **'अनन्ताः पङ्क्तयः'** अनयोः पदयोः किं विशेष्यपदम्?<br>(ii) **'धूम्रं'** कृते किं समानार्थकपदं गद्यांशे प्रयुक्तम्?<br>(iii) **'मुञ्चति'** क्रियायाः किं कर्मपदं गद्यांशे प्रयुक्तम्? | 1x2=2<br><br><br><br>1x2=2 |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>रामः - एष भवतो: सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि क्षत्रियकुलपितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्त्ता ?<br>लवः - भगवन् सहस्रदीधितिः ।<br>विदूषकः–किं द्वयोरप्येकमेव प्रतिवचनम् ?<br>लवः– भ्रातरावावां सोदर्यौ ।<br>रामः– समरूपः शरीरसन्निवेशः । वयसस्तु न किञ्चिदन्तरम्।<br>लवः– आवां यमलौ ।<br>रामः– सम्प्रति युज्यते । किं नामधेयम् ?<br>लवः– आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम् ..........।<br>**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) सूर्यचन्द्रयोर्वंशस्य कर्त्ता कः ?<br>(ii) 'भ्रातरावावां सोदर्यौ' इति कः उत्तरयति?<br>(iii) 'समरूपः शरीरसन्निवेशः' इति कः उत्तरयति?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) किं द्वयोरप्येकमेव प्रतिवचनम्? विदूषकस्य प्रश्ने लवः किं कथयति?<br>(ii) 'भ्रातरावावां सोदर्यौ' लवस्य उत्तरे रामः किं कथयति?<br>(iii) भगवान् सहस्रदीधितिः कयोः वंशस्य कर्ता?<br>**ई) यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)**<br>(i) **'सोदर्यौ भ्रातरौ'** अनयोः पदयोः किं विशेष्यपदम्?<br>(ii) **'आयोः'** कृते किं समानार्थकपदं गद्यांशे प्रयुक्तम्? | 5<br><br><br><br><br><br><br><br><br><br>½x2=1<br><br><br><br>1x2=2<br><br>1x2=2 |

| | | |
|---|---|---|
| | (iii) **'किं द्वयोः अपि एकमेव प्रतिवचनम्'** अत्र किं अव्ययपदम् अस्ति? | |
| | | |
| **15.** | रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवल प्रश्नचतुष्टयम्)<br>(i) उद्याने **पक्षिणां** कलरवः चेतः प्रसादयति।<br>(ii) यदि त्वं **मां** मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।<br>(iii) अपूर्वोऽयं **मानवानां** सरस्वत्यवतारः।<br>(iv) अचिरादेव चण्डवातेन **मेघरवैश्च** सह प्रवर्षः समजायत।<br>(v) सहस्राधिकेषु **पुत्रेषु** सत्स्वपि तव अस्मिन्नेव वात्सल्यं कथम्? | 1x4=4 |
| **16.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -**<br>**अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।**<br>**अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः।।**<br><br>अन्वयः– अमन्त्रम् …………(i)……न अस्ति। (किमपि) मूलम् …………(ii)………, (कोऽपि) ………(iii)…… अयोग्यः न अस्ति। केवलं योजकः तत्र ……(iv)……………अस्ति।<br>मञ्जूषा<br>[ पुरुषः, अक्षरं, अनौषधम्, दुर्लभः ]<br>**अथवा**<br>मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –<br>**सम्पत्तौ च विपत्तौ च महतामेकरूपता।**<br>**उदये सविता रक्तो रक्तश्चास्तमये तथा।।**<br>**भावार्थः**– ये महान्तो जनाः भवन्ति तेषां ..…….(i)…… विपत्तौ च ……(ii)…… भवति। यथा उदये ………(iii)…….. रक्तो भवति तथैव अस्तसमये सविता……(iv)…… भवति।<br>मञ्जूषा<br>[ सम्पत्तौ, ,सविता, एकरूपता, रक्तः ] | 1x4=4<br><br>1x4=4 |
| | | |

| | | |
|---|---|---|
| **17.** | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत -**<br>(i) कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः?<br>(ii) तत्र राजसिंहः नाम राजपुत्रः वसति स्म।<br>(iii) अयमेकस्तावद्विभज्य भुज्यताम्।<br>(iv) एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।<br>(v) पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।<br>(vi) इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।<br>(vii) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।<br>(viii) सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद। | ½x8=4 |
| | | |
| **18.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत–**<br>**(i)** भगवन् **<u>सहस्रदीधितिः</u>** अस्माकं वंशस्य कर्त्ता<br>(क) सूर्यः (ख) शरीरम् (ग) जलम् (घ)<br><br>**(ii)** वायुमण्डलं **<u>भृशं</u>** दूषितम् ।<br>(क) कुटिलम् (ख) शरीरम् (ग) जलम् (घ) अधिकम्<br><br>(iii) मह**<u>त्कौतुकम्</u>** आवेदितं त्वया ।<br>(क) सूर्यः (ख) आश्चर्यम् (ग) पाषाणः (घ) वक्रम्<br><br>(iv) शरीरेण दुर्बलः **<u>जवेन</u>** गन्तुम् असमर्थः॥<br>(क) प्रस्तरः (ख) तनुः (ग) जलम् (घ) शीघ्रतया | 1x3=3 |